International Journal of Sanskrit Research 2019; 5(5): 181-187

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 181-187
© 2019 IJSR
www.anantaajournal.com
Received: 09-07-2019
Accepted: 13-08-2019

**Uday Shankar Khatua**
Assistant Professor (Wbes),
Dept. of Sanskrit, Nayagram
Pandit Raghunath Murmu Govt.
College, Baligeria, Jhargram,
West Bengal, India

**Corresponding Author:**
**Uday Shankar Khatua**
Assistant Professor (Wbes),
Dept. of Sanskrit, Nayagram
Pandit Raghunath Murmu Govt.
College, Baligeria, Jhargram,
West Bengal, India

# कारकसामान्यलक्षणसमीक्षा

**Uday Shankar Khatua**

**सारसंक्षेपः**

'कारके' इति सूत्रमादाय बहुभिः व्याख्यतृभिः या व्याख्याः प्रस्तुताः तासु मतानैक्यं विराजते। केषाञ्चन नये क्रियान्वयित्वं हि कारकत्वं, केषाञ्चन च नये क्रियानिमित्तत्वं कारकत्वम्। किं बहुना नैयायिकैरपि कारकलक्षणं किं भवेदिति विषये बह्वी चर्चा विहिता । नैयायिक-वैयाकरणयोः कारकलक्षणमादाय विवादोऽपि दृश्यते। पाणिनिना तु स्वयं कारकलक्षणं न लिखितम् । परन्तु तन्निर्मितं सूत्रमेव वैयाकरणोक्तलक्षणानां मूलम्। अस्मिन् पत्रे तु कारके इति संक्षिप्तसूत्रेण कथम् व्याख्याकृद्भिः निगदितानि लक्षणानि निर्मीयते, वैयाकरण-नैयायिकयोः विवादस्य निष्पत्तिरपि विधीयते ।

**सारात्सारः** कारकशब्दनिर्वचनं, कारकलक्षणनिर्माणं, कारकलक्षणपरीक्षा

## प्रस्तावना

वैयाकरणमूर्धन्यभूतेन महामुनिना पाणिनिना 'कारके' इति सूत्रमष्टाध्याय्यामधिकारत्वेन पठितम् । यद्यपि इदमधिकारसूत्रमिति तेन न लिखितं, तथापि स्वरितत्वप्रतिज्ञाबलात् व्याख्याकृद्भिः अधिकारत्वेनैव व्याख्यातम्। सूत्रमिदं संक्षिप्तमपि अर्थप्राचुर्यं वहति । अधिकारत्वात् तत्परवर्तिषु सूत्रेषु विभक्तिविपरिणामेन अनुवर्तते। सूत्रमिदमादाय बहुभिर्व्याख्याकृद्भिः विस्तृतमालोचनं विहितम् । महाभाष्ये पतञ्जलिना अस्य सूत्रस्य या व्याख्या विहिता, सैव तत्परवर्तिनां वैयाकरणानां व्याख्यासमूहजननी। अतः सूत्रस्यास्य निगूडार्थानुसन्धानमादौ भाष्यामनुसृत्य विधीयते । भाष्यकारनये कारकमित्येका महासंज्ञा । यद्यपि संज्ञाया भाव्यमानत्वेन प्रथमयैव वक्तुमुचितं तथापि सप्तम्या निर्देशः नायुक्तः। अत्र प्रथमायाः स्थाने सप्तमी विहिता । न च नियमस्यास्य वेदे एव दर्शनात् अष्टाध्याय्यां प्रयोगः भ्रान्त इति शङ्क्यः, सूत्राणां पाणिनिप्रणीतत्वेन, पाणिनेश्च आर्षत्वेन प्रसिद्धेः, वेदवद् व्यवहारात् –"छन्दोवत्सूत्राणि भवन्ति" इति प्रमाणाच्च । महासंज्ञा तु उद्देश्यविशेषसिद्धये एव क्रियते । विषयेऽस्मिन् भाष्यकृतोक्तम्- "कारके इति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः। कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्या संज्ञाया करणे एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत करोती' ति" [१] इति ।

अतो महासंज्ञया यथा संक्षेपेण विवक्षितार्थं प्रतिपाद्यते तथैव अन्वर्थसंज्ञाज्ञानमपि भवति । अन्वर्थसंज्ञा नाम यस्यां संज्ञायां संज्ञाघटकीभूतपदानां प्रकृति-प्रत्ययादिविश्लेषणेन अर्थविशेषो लभ्यते । तस्मादुक्तं कैयटेन –“महासंज्ञा उपस्थितक्रियानिर्वतकत्वरूपः” [२] इति । अत्रेदं ज्ञेयं यत् संज्ञायाः पक्षद्वयं स्तः- रूढो यौगिकश्च । यथा रामशब्दो रूढ्या ‘दशरथस्यापत्यं पुमान्’ इत्येवमर्थं प्रकाशयति । यौगिकेन तु ‘रमन्ते योगिनोऽस्मिन्’ इत्येवं रूपोऽर्थः प्राप्यते । कारकमिति संज्ञापदमन्वर्थकम्, अर्थाद् यौगिकम् । कारकशब्दस्य प्रकृतिस्तु ‘कृ’ इति धातुः। प्रत्ययस्तु ‘ण्वुल्’ इति । ‘डुकृञ् करणे’ इति धातुपाठात् कृ-धातुः करणार्थः। ण्वुल्-प्रत्ययः कर्तरि विधीयते । एतेन करोतीत्यर्थः लभ्यते । किं करोति इत्याकांक्षायां क्रियामिति प्राप्यते । अतः करोति क्रियां निष्पादयति इति कारकमिति सिद्ध्यति । क्रियासम्पादनाय तु कस्यचिच्चेतनस्य आवश्यकता वर्तते । स एव कर्तृपदवाच्यः। एतेन क्रियानिष्पत्तेः कर्तार एव कारकपदवाच्याः । ननु कारकपदं कर्त्रर्थकं चेत्, कारके सूत्रस्य अधिकारत्वेन अपादानादिषु व्याप्तत्वात् अपादानादीनां कतृत्वं दुर्बारं स्यादित्यभिप्रेत्य भाष्यकृतोक्तं – “अन्वर्थमिति चेदकर्तरि कतृशब्दानुपपत्तिः” [३] इति । विषयेऽस्मिन् वक्तव्यं यदपादानादीनां कर्तृभावः सिद्ध एव । कथमिति चेदुत्तरितं भाष्ये –“प्रति कारकं क्रियाभेदात् पचादीनाम्” [४] इति । प्रदीपकृता अपि उक्तं – “करोतीति कारकमिति यदाश्रीयते तदा स्वतन्त्रस्यैव कर्तृसंज्ञावत्कारकसंज्ञा प्राप्नोति, न तु कपणादीनां कर्तृपरतन्त्राणामि” ति[५] । वस्तुत एका क्रिया अनेकावान्तरव्यापारसमन्विता । तदुक्तं –

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ।।[६] इति ।

तस्याः समूहरूपायाः क्रियायाः सिद्ध्यर्थं सर्वाण्येव कारकाणि सहायकानि । प्रत्येकक्रियायाः सिद्ध्यर्थं समेषां कारकाणां कर्तृत्वं विद्यते एव, क्रियासिद्धौ उपकारकत्वात् । तदुक्तं –

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां करणत्वादिसम्भवः।।[७] इति ।[1]

स्वव्यापारानुष्ठाने सर्वेषां स्वातन्त्र्यात् तदनुष्ठानद्वारेण प्रधानक्रियायामुपयोगात् कर्तृसन्निधावपि स्वव्यापारस्यानिर्वर्तनात् पारतन्त्र्यावस्थायामपि अनिर्वृत्तं कारकत्वम् । यथा सन्तानोत्पत्तौ मातापित्रोरुभयोरपि सत्त्वेऽपि कर्तृत्वे भेदविवक्षया तु मातुः कदाचित्कर्तृत्वं कदाचिच्चापादानत्वं, कदाचिद्वाधिकरणत्वम् । तथाह्युक्तं –

पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते ।
अयमस्यामियं तस्मादिति भेदो विवक्षया ।।[८] इति ।

वस्तुतः प्रधानीभूतक्रियायाः सम्पादकस्यैव कारकत्वम् । अत उक्तं नागेशेन- “सर्वकारकाणां धात्वर्थेऽन्वयः” इति । अपि चोक्तं - “सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया, ततश्च सर्वेषां तस्यां कर्तृत्वम् । अवान्तरव्यापारविवक्षायां तु करणत्वादिरूपम् । यथा मातापित्रोरपत्योत्पादने कर्तृत्वं भेदविवक्षायां तु अयमस्यामियमस्माज्जनयति इत्यधिकरणत्वमपादानत्वञ्च व्यवतिष्ठते” [९] इति ।

अतःकारकपदस्य कर्तृत्वरूपार्थः सिद्ध एव । महाभाष्यकारस्तु कारके सूत्रस्य व्याख्यायाः समाप्तौ कारकशब्दस्य क्रियाशब्दपरत्वं सिद्धान्तितम् – “अथवा यावद्ब्रूयात् क्रियायामिति । एवञ्च कृत्वा निर्देश उपपन्नो भवति कारके इति” [१०] इति । कैयटेनास्य व्याख्यायामुक्तं – “क्रियात्र सूत्रे कारकशब्देनोच्यते । सा हि कर्त्रादीनि विशिष्टव्यपदेशयुक्तानि करोति”[११] इति । क्रियायामित्यत्र क्रियाशब्दोत्तरसप्तम्या अर्थः विषयः । विषयत्वं नाम जनकत्वम् । अतः क्रियाजनकत्वं कारकत्वमिति फलितोऽर्थः। वृहच्छब्देन्दुशेखरेऽपि प्रदीपकारस्य समर्थनं दृश्यते – “करोति कर्तृ-कर्म-व्यपदेशान् इति व्युत्पत्त्या कारकशब्दः क्रियापरः तेन क्रियायामित्यर्थः”[१२] इति । शेखरकारोऽपि भाष्यवचनतात्पर्यं प्रकाशयोक्तं – “कारकं क्रियाजनकत्वं, भाष्ये करोति क्रियां निर्वर्तयति इति व्युत्पत्तिदर्शनात् ...अत एव एषां क्रियायामेवान्वयः, क्रियाजनकमिति ज्ञाते का सा क्रिया इत्याकांक्षोदयेन क्रियाया जनकाकांक्षया च तत्रैवान्वयस्यौचित्यात्”[१३] । इति । एतेन कारकं क्रियान्वयि इत्यपि

[५] म.भा.- १.४.२३ (प्रदीपटीकायां)

[७] वा.प. साधनसमुद्देशः-१८

[९] लघुमञ्जुषायां

[१०] म . भा – १.४.२३ प्रदीपटीकायां

[११] म . भा – १.४.२३ प्रदीपटीकायां

[१२] बृ.शे, कारकप्रकरणे

[१३] ल.शे, कारकप्रकरणे

स्थितम् । अन्वयश्च जन्यजनकभावघटितक्रियाकारकभावसम्बन्धेन । भाष्यकृतापि कारकस्य क्रियाजनकत्वं क्रियानिर्वर्तकत्वं वा सिद्धान्तितम् – "एवं तर्हि सामान्यभूता क्रिया वर्तते । तस्या निर्वर्तकं कारकम्"[१४] । इति । अत एव क्रियाजनकत्वम्, क्रियानिर्वर्रतकत्वं क्रियान्वयित्वं वा कारकत्वम् इति भाष्यानुसारिकारकलक्षणम् ।

कशिकाकारनये कारकशब्दो निमित्तार्थकः । तथाहि तेन 'कारके' इति सूत्रस्य वृत्तावुक्तं – "कारकशब्दश्च निमित्तपर्यायः । कारकं हेतुरिति अर्थान्तरम् । कस्य हेतुः? क्रियायाः"[१५] । इति । तेन करकस्य व्युत्पन्नाव्युत्पन्नरूपपक्षद्वयमङ्गीकृत्य अव्युत्पन्नस्यैव ग्रहणं कृतम् । वस्तुतः व्युत्पन्नकारशब्दस्य ग्रहणे दोषः स्यात् तस्मान्निमित्तपर्यायस्य कारकशब्दस्य ग्रहणम् । अव्युत्पन्नपक्षे एव कारकशब्दो निमित्तपर्यायः। तन्नये कर्तृशब्दवत्कारकशब्दोऽपि 'ण्वुल्तृचावि'ति कर्तरि ण्वुलि व्युत्पादितः । तेन कारकस्य कर्तेति अपरपर्यायः स्यात् । यथा च कर्ता स्वतन्त्रो न तथा अपादानादयः । अपादानादयस्त्वस्वतन्त्राः । अतस्तेषु कारकव्यपदेशो न स्यात् । असति च कारकव्यपदेशे कारकसंशब्दनेषु तेषां ग्रहणं न स्यात् । अथ कथञ्चित् तेषामपि स्वतन्त्रताभ्युपेयेत । एवञ्च तत्र कर्तृसंज्ञा प्रसज्येत । इतरेतराश्रयदोषश्चोद्भाव्येत । तदुक्तं न्यासकृता – "कर्तृसंज्ञोत्तरकालं कारकशब्दस्य व्युत्पत्तिः, तस्यां सत्यां कारकशब्दोपक्रमणेन कर्तृसंज्ञा स्यात् । बह्वेवं प्रतिविधेयं स्यात्, प्रतिविधाने च प्रतिपत्तिगौरवं भवेत्"[१६] । इति । परन्तु निमित्तपर्यायस्य ग्रहणे न दोषः, अतः स एव गृहीतो ग्रन्थकृता । पदमञ्जरीकृता तु उभयस्यैव पक्षस्य ग्रहणं कृतम् । तेन भाष्यमनुसृत्य अपादानादीनां कर्तृत्वं निवार्यते । तथाह्युक्तं तेन - "कारकशब्दोऽयमस्ति ण्वुलन्तः – करोति कारकमिति, अस्त्यव्युत्पन्नः संज्ञाशब्दो निमित्तपर्यायः, तत्र पूर्वस्य ग्रहणेऽपादानादिषु कारकसंज्ञा न प्रवर्तते । यथा कर्तृशब्दः। तेषामस्वतन्त्रत्वात् । स्वातन्त्र्ये वा पक्षे कर्तृसंज्ञा प्रसज्येत, नैष दोषः, सर्वमेव खलु कारकं यथायथमवान्तरव्यापारं निर्वर्तयन् प्रधानक्रियायामुपयुज्यते, सा च सकलकारकजन्या फलभूता विक्लित्त्यादिरूपा क्रिया प्रधानक्रिया । यद्वा सामान्यभूता क्रिया प्रधानक्रिया फलजनना नाम, सर्वाणि हि कारकाणि फलजननाय प्रवर्तन्ते, अतो यद्यत्फलजननारूपं तत्तत्सर्वेष्वेव कारकेष्वविशिष्टम् । किञ्चित्खलु कारकं केनचिदेव रूपेण फलं जनयति इति फलजनना सर्वेषामभिन्नरूपा । अवान्तरभेदविवक्षायां तु करणादिरूपोन्मेषः" [१७] । इति । अत एव व्युत्पन्नस्यापि ग्रहणे न दोषः । पदमञ्जरीकारनयमङ्गीकृत्य क्रियाजनकत्वं कारकत्वमिति वक्तुं शक्यते । तेन क्रियानिमित्तत्वं कारकत्वमित्यपि स्वीकृतम् । काशिकाकारेण तु अव्युत्पन्नस्य कारकशब्दस्य ग्रहणात् क्रियानिमित्तत्वं कारकत्वम् इत्येव कारकलक्षणमिति वक्तव्यम् । वाक्यपदीयकारनये तु कारकमाश्रितव्यापारम् । तदुक्तं तेन –

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।।[१८] इति ।

किञ्च, तेन क्रियानिर्वृत्तौ द्रव्यगतशक्तेः कारकत्वमङ्गीक्रियते- "क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः"[१९] इति । यद्वा भवतु क्रियानिर्वर्तकमेव कारकम् । ननु सा क्रिया द्विधा व्युत्पाद्यते- क्रियते या सा क्रिया इति व्युत्पत्या, क्रियतेऽनया इति क्रिया इति च । आद्येन फलम्, अन्त्येन च व्यापारः प्रतीयते । कारकलक्षणघटकीभूतक्रिया तु रूढ्या व्यापारार्थक एव । स च व्यापारो धातुवाच्य एव –" फलव्यापारयोर्धातुरि" [२०] ति उक्तत्वात् । एतेन धातुवाच्यव्यापारोत्पत्त्यनुकूलव्यापारवत्त्वं कारकत्वमिति फलितम् । मनोरमाकारनये तु कारकं क्रियान्वयि । तदुक्तं तेन – "कारकमित्यस्य क्रियान्वयीत्यर्थः"[२१] इति ।

ननु क्रियायां सन्निहितस्य कारकत्वमुत असन्निहितस्य ? इति चेद्वक्तव्यम् सन्निहितजनकत्वस्य तु कारकत्वं सुनिश्चितम्, असन्निहितस्यापि जनकत्वमस्त्येव, अतस्तस्यापि कारकत्वमस्त्येव । तदुक्तं नागेशेन – असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालत्वेनैव जनकत्वम्"[२२] इति । यथा जनिष्यमाणस्य पुत्रस्य गां दास्यामि इत्यादौ । न चात्र असम्प्रदानस्य असन्निहितत्वात् कारकत्वाभाव इति शङ्कनीयः । अत्र तु सम्प्रदानवर्तिन्या दानजनकतायाः सम्प्रदाने आरोपात् कारकत्वं सिद्ध्यति । ननु घटस्य अनुत्पत्तिदशायामिष्यमाणस्य 'घटं करोमी'ति प्रयोगस्य असाधुत्वं,

[१४] म . भा – १.४.२३ मूले

[१५] का.वृ, १.४.२३ सूत्रवृत्तौ

[१६] का.वृ- १.४.२३ (न्यासः)

[१७] का.वृ- १.४.२३ (पदमञ्जरी)

[१९] वा.प. साधनसमुद्देशः-१

[२१] वै.सि.कौ. बालमनोरमायां

[२२] ल.सि.कौ - १.४.२३ वृत्तौ

घटस्याविद्यमानत्वेन क्रियाजनकत्वासम्भवात् । एवं 'घटं स्मरामी'त्यत्रापि घटे स्मरणजनकत्वासम्भवात् कारकत्वाभावः स्यात् । अत्रेदं वक्तव्यं यत् 'घटं करोमी'त्यादौ मृदादिवृत्तिजनकत्वस्य 'घटं स्मरामी'त्यादौ सम्बन्धिज्ञाननिष्ठजनकत्वस्य घटे आरोपात् कारकत्वसिद्धिः । अत्रारोपे प्रमाणं तु तत्र तत्र भाष्यादौ तेषां कारकत्वेनैव व्यवहारः । स्वेच्छया जनकत्वारोपेण तु कारकत्वं नायाति ।

एतावता वैयाकरणसम्मतकारकलक्षणानि सोदाहरणं परीक्षितानि । तेन वैयाकरणानां व्याख्याप्रसूतानि लक्षणानि हि - क्रियाजनकत्वं, क्रियानिर्वतकत्वं, क्रियानिमित्तत्वं, क्रियान्वयित्वं वा कारकत्वम् इति सिद्धान्तः।

**भवानन्दसम्मतकारकसामान्यलक्षणपरीक्षा –**

लक्षणस्य निर्दुष्टत्वमेव काम्यम् । अव्याप्त्यतिव्याप्त्यसम्भवादिदोषरहितत्वमेव निर्दुष्टत्वम् । भवानन्दसिद्धान्तवागीशमहाभागेन तु वैयाकरणोक्तकारकलक्षणेषु दोषमुद्भाव्य स्वमतसम्मतं निर्दुष्टलक्षणमुक्तं- "विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वमि"[२३] ति । न केवलं भवानन्देन, नैयायिकैरन्यैरपि वैयाकरणलक्षणेषु अनादरः प्रदर्शितः ।

**दोषपरीक्षा** – मैत्रस्य तण्डुलं पचतीत्यत्र मैत्रस्य सम्बन्धिपदत्वेन सत्यपि क्रयादिना संग्रहकर्तृहेतुत्वे, मैत्रे पाकक्रियाया जनकत्वं निमित्तत्वं वा अरोपयितुं शक्यते । तत अरोपितजनकत्वमादाय मैत्रस्य कारकत्वं संगच्छते । परन्तु मैत्रस्य सम्बन्धित्वात् तस्य कारकत्वं न कैश्चिदपि स्वीक्रियते । अरोपितजनकत्वमादाय कारकत्वे तु स्वीकृते अलक्ष्ये लक्षणगमनरूपातिव्याप्तिदोषः स्यात् । अतः क्रियानिमित्तत्वं कारकत्वमिति लक्षणमतिव्याप्तिदोषदुष्टम् ।

कैश्चित्पुनः लक्षणेऽतिव्याप्तिदोष उद्भाव्यते । अव्याप्तिपक्षे तु लक्षणघटकीभूतनिमित्तं नाम कारणम् । कारणस्य तु कार्यनियतपूर्ववृत्तित्वमेव नियमः । परन्तु घटं करोमीत्यादिस्थले निर्वर्त्यकर्मीभूतघटस्य क्रियापूर्ववर्तित्वाभावेऽपि कर्मत्वस्य दर्शनादव्याप्तिः[*]। मतमिदमसंगतम् । क्रियासिद्धौ घटस्य पूर्ववर्तित्वाभावेऽपि घटज्ञानस्य पूर्ववर्तित्वसिद्धत्वात् घटस्यापि पूर्ववर्तित्वमुपचर्यते । अतो न दोषः । अतः पूर्वोक्तोऽतिव्याप्तिदोष एव सुस्थिरः। सम्बन्धिनो कारकत्वं कथमायाति इति विषये उक्तं - सम्प्रदानादेरनुमतिप्रकाशद्वारेव तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन सम्वन्धिनि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः"[२४] इति । अत्र अनुमतिप्रकाशद्वारा इत्युपलक्षणम् । तेन अपादानेऽपि पतनप्रतिबन्धकसंयोगनाशकविभागद्वारा पतनक्रियानिमित्तत्वं बोध्यम् । सम्बन्धिपदानामकारकत्वं तु सर्वस्वीकृतम्, क्रियान्वयित्वाभावात् । सम्बन्धिपदानामन्वयस्तु नाम्ना एव भवति । अत उक्तं कारकचक्रे – "षष्ठ्या नामार्थसाकांक्षतया क्रियाया अपि कर्मादिसाकांक्षतया परस्पराकांक्षाविरहात्"[२५] इति । किन्तु विधिबलेन क्वचित् कर्तरि कर्मणि च षष्ठीविभक्तिर्भवति । यथा चैत्रस्य पाकः, ओदनस्य भोक्ता इत्यादौ । षष्ठ्या अर्थः यथाक्रमेण कर्तृत्वं कर्मत्वं च । अतः शाब्दिकाः केवलं सम्बन्धषष्ठ्या एव कारकत्वं नाङ्गीकुर्वन्ति । अतः शाब्दिकानां मतं भवानन्देनोक्तं – "सम्बन्धस्य कारकत्वं नास्ति क्रियायोगाभावादिति शाब्दिकाः" इति । अस्ति च शाब्दिकोक्तिः –

क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम् ।
कर्तृकर्मादिभेदेन शेषः सम्बन्ध इष्यते ।।[२६] इति ।

येषां षष्ठ्यन्तपदानां तु क्रियया योगः विद्यते तेषु "षष्ठी शेषे"[२७] इति पाणिनिसूत्रं प्रवर्तते । भट्टोजिदीक्षितेनास्य सूत्रस्य वृत्तावुक्तं – "कर्मादीनामपि सम्बन्धमात्रविवक्षया षष्ठ्येव"[२८] इति । अत एते कारकशेष इति वक्तुं शक्यते । यथा सतां गतम् इत्यत्र सत्पुरुषसम्बन्धिगमनमित्यर्थबोधः। अत्र कर्तृत्वमविवक्षितम् । यदि तु कर्तृत्वरूपसम्बन्धविशेषः विवक्षितः स्यात्तर्हि 'सन्तो गच्छन्ति' इत्येवं प्रयोगः स्यात् । शब्दशक्तिप्रकाशिकायामपि सम्बन्धस्याकारकत्वं निराक्रियते –"धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्" [२९], इति । अस्याः कारिकाया वृत्तावुक्तम्- "षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थांशे प्रकारीभूय भासते, तण्डुलस्य पचतीत्याद्यप्रयोगात्, अतः सम्बन्धो न

---

[२३] का. च

[*] लक्ष्यैकदेशवृत्तित्वमव्याप्तित्वम्, अथवा लक्ष्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वमव्याप्तित्वम्

[२४] काच .

[२५] काच .

[२७] अष्टाध्यायी- २.३.५०

[२८] वै.सि.कौ.- २.३.५० सूत्रवृत्तौ

कारकम्, न वा तदर्थिकापि कारकविभक्तिः" [३०] इति । हरिणापि सम्बन्धस्याकारकत्वमुद्घोषितम् –

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियार्था सोऽभिधीयते ।।[३१] इति ।

अतः सम्बन्धस्य क्रियान्वयित्वाभावात् कारकत्वाभावेऽपि वैयाकरणोक्तलक्षणानुसारेण कारकत्वप्रसंगात् (अरोपितजनकत्वमादाय) अतिव्याप्तिरिति नैयायिकप्रतिनिधिभूतस्य भवानन्दस्य वक्तव्यम् । यद्यपि भवानन्देन केवलमतिव्याप्तेरुल्लेखो विहितस्तथापि उपलक्षणसामर्थ्यात् अव्याप्तिदोषोऽपि अस्ति इति प्रभाटीकायामुक्तम् । यथा 'गण्डति कपोलम् 'इत्यादौ गण्ड्-धातोरर्थो वदनैकदेशः, 'गडि वदनैकदेशे' इति गणोक्तेः, आख्यातार्थश्च तादात्म्यम् । तेन वदनैकदेशतादात्म्यवान् गण्ड इत्येवं शाब्दबोधो भवति । वदनैकदेशरूपार्थकक्रियायाः कर्तरि गण्डे तादृशक्रियाप्रयोजकत्वासम्भवात् अव्याप्तिः । एवं गगनं द्रव्यं भवति इत्यादौ द्रव्यतादात्म्यस्यैव भुवः शक्यतया तादृशक्रियाकर्तरि गगने तादृशक्रियाया अप्रयोजकत्वेन अव्याप्तिरिति बोध्या ।

तस्मादेव भवानन्दसिद्धान्तवागीशेन तदीये कारकचक्रे वैयाकरणमतानि खण्डयता सिद्धान्तत्वेन उक्तम् – "किन्तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वं क्रियानिमित्तत्वसहितं मुख्यम्"[३२] इति । एतेन क्रियाविषयतानिरूपितविभक्त्यर्थविषयतानिरूपितविषयताश्रयत्वं कारकत्वम् इति । भवानन्देन कारकस्य मुख्यगौणरूपभागद्वयमङ्गीकृतम् । तथाहि क्रियानिमित्तत्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यम्। अत्र उपलक्षणसामर्थ्यात् क्रियाया अनिमित्तत्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं भाक्तमिति लभ्यते । उभयत्रापि क्रियानिमित्तत्वं साक्षात्परम्परासाधारणं प्रयोजकत्वरूपम् । ननु विभक्त्यर्थद्वारेति पदनिवेशेन किं प्रयोजनम् इत्युत्तरितम् स्वग्रन्थे – "स्तोकं पचतीत्यादौ क्रियाविशेषणेऽतिव्याप्तिवारणाय विभक्त्यर्थद्वारा"[३३] इति । 'स्तोकं पचती'त्यत्र स्तोकपदस्य क्रियाप्रयोजकत्वं क्रियानिमित्तत्वं वा नास्ति परन्तु क्रियान्वयित्वमस्ति । क्रियान्वयित्वे सत्त्वेऽपि कारकत्वं नास्ति । विभक्त्यर्थद्वारेति पदाभावे तु क्रियान्वयित्वं कारकत्वमिति वैयाकरणोक्तलक्षणमत्र व्याप्तं स्यात् । नैयायिकानुसारं स्तोकमिति अलक्ष्यम्, अतोऽलक्ष्ये लक्षणगमनरूपातिव्याप्तिः स्यात् । अत्रेदं ज्ञातव्यं यत् नैयायिकैः क्रियाविशेषणानां कर्मरूपकारकत्वं न स्वीक्रियते। ननु स्तोकस्य कारकत्वाभावात् तदुत्तरं विभक्तिनिवेशोऽशक्य इति चेन्न, तत्र तत्र विभक्तिनिवेशः प्रयोगसाधुत्वार्थम्, 'नापदं शास्त्रे प्रयुञ्जीत' इत्युक्तेः । तदुक्तं - "स्तोकं पचतीत्यादौ क्रियाविशेषणे द्वितीया विशेषणविभक्तिवत्प्रयोगसाधुत्वार्थम्" [३४] इति । अतो विशेषणपदानां कारकत्वाभावात् समासोऽपि तैर्न स्वीक्रियते । अतो नैयायिकनये अव्याप्तिदोषः।

ननु चैत्रस्य पचतीत्यदौ चैत्रस्य सम्बन्धिपदतया नामपदाभावात् अगत्या षष्ठ्यार्थस्य पाकेऽन्वयः, तेन चैत्रस्यापि कारकत्वापत्तिरिति चेन्न, तण्डुलादिनामाध्याहारेणैव चैत्रस्यान्वयस्य करणीयत्वात् । तेन अतिव्याप्तिदोषः अपास्तः । क्वचिच्च विनापि नामाध्याहारं षष्ठ्यर्थस्य क्रियायामन्वयो भवति । यथा 'गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः' इत्यादौ रोगोपोशमो यदि प्रकृतो धात्वर्थः, तदा विनाध्याहारं षष्ठ्यर्थस्याधेयत्वस्य धात्वर्थैकदेशे रोगेऽन्वयः। तदा त्वतिव्याप्तिदोषः स्यात् । अतो भवानन्देन अपरमेकं लक्षणं उक्तम् – "कर्तृत्वकर्मत्वाद्यन्यतमद्वारा क्रियान्वयित्वं कारकत्वम्" इति । यदि तु प्रोक्ते उदाहरणे उपशमो हि धात्वर्थःस, तदा रोगमिति पदाध्याहारेणैव अन्वयबोधो भवति । तदा तु षष्ठ्यर्थस्य नाम्नैवान्वयात् क्रियान्वयित्वाभावाच्च नाव्याप्तिः । एवं घटं निरूपयति इत्यादौ निरूपणरूपधात्वर्थे ज्ञानानुकूलव्यापारे विभक्त्यर्थद्वारा घटादेरनन्वयात् घटादावव्याप्तिः, नारदाय रोचते कलहः नारदादेरपि कारकत्वापत्तिः, तेषामपि विभक्त्यर्थद्वारा क्रियान्वयित्वात् । क्वचित् षष्ठ्यर्थस्यापि साक्षात् क्रियायामन्वयो भवति। अतः केवलं विभक्त्यर्थद्वारा इत्युक्ते षष्ठीरूपविभक्त्यर्थद्वारा क्रियान्वयसत्त्वात् "कर्तृत्वकर्मत्वादिषड्न्यतमद्वारा क्रियान्वयित्वं कारकत्वमि"[३५] त्यपि सिद्धान्तत्वेन वक्तव्यम् ।

**सिद्धान्तः**

'कारके' इति सूत्रं पर्यालोच्य वैयाकरणम्मतकारकलक्षणानि हि - क्रियाजनकत्वं, क्रियानिर्वतकत्वं, क्रियनिष्पादकत्वं वा कारकत्वम्

[३०] श.श.प्र, कारकप्रकरणम्- ६३तमकारिकाया वृत्तौ

[३२] का.च.

[३३] का.च.

[३४] का.च.

[३५] का.च.

(महाभाष्यकारनागेशाद्यनुसारि), क्रियानिमित्तत्वं (काशिकानुसारि) क्रियान्वयित्वं कारकत्वम् (भट्टोजिदीक्षिताद्यनुसारि) इति सिद्धान्तः।

'स्तोकं पचतीत्या' दौ पूर्वोक्तदोषखण्डनम् - वैयाकरणनये स्तोकादिविशेषणपदानामपि कारकत्वसत्त्वात् वैयाकरणानुसारं नास्ति अतिव्याप्तिः। क्रियाविशेषणानामपि कर्मत्वमस्ति । तच्च 'अकथितञ्च'[३६] इति सूत्रेण व्यवस्थाप्यते । नागेशेन क्रियाविशेषणानां कर्मत्वमुक्तम् – "फलस्यापि व्यपदेशिवद्भावेन फलसम्बन्धित्वात् कर्मत्वम् । अत एव तत्समानाधिकरणे स्तोकं पचतीत्यदौ कर्मत्वसिद्धिः"[३७] इति । पाणिनिसम्प्रदायेऽपि एका प्रसिद्धिरस्ति यत् – "क्रियाविशेषणानां कर्मत्वमेकत्वं नपुंसकत्वञ्च" इति ।

चैत्रस्य पचतीत्यादौ यो दोषः वैयाकरणलक्षणस्वीकारे दृश्यते सोऽपि नामाध्याहारेणैवापाकर्तुं शक्यते । ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यादौ ब्राह्मणस्य क्रियाजनकत्वाभावात्, पुत्रेणान्यथासिद्धत्वाच्च न कारकत्वम्। तदुक्तं नागेशेन - "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यादौ ब्राह्मणस्य न कारकत्वम्, पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्"[३८] इति । नागेशेन तु क्रियानिमित्तत्वं कारकत्वमिति न स्वीक्रियते, चैत्रादावतिव्याप्तेः । अतस्तेनापि "विशेष्यतया क्रियान्वितविभक्त्यर्थान्वितत्वं क्रियानिर्वर्तकत्वं वा कारकत्वम्" [३९] इति स्वीकृतम्। अपि चोक्तं –ननु क्रियानिमित्तत्वं कारकत्वमिति स्वीकरणीयमिति चेन्न, चैत्रस्य तण्डुलं पचतीत्यत्र सम्बन्धिनि चैत्रादावतिव्याप्तेः। अनुमत्यादिप्रकाशद्वारा सम्प्रदानादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात्"[४०] इति । अर्थात् षष्ठ्यर्थस्य साक्षाज्जनकत्वेन क्रियान्वयाभावात् नातिव्याप्तिः। क्रियानिमित्तत्वं कारकत्वमित्यत्र निमित्तत्वं नाम जनकत्वम् । एतच्च निमित्तत्वं साक्षात्परम्परासाधारणं कारणम् । क्रियायाः साक्षान्निमित्तत्वस्य कारकत्वं तु निर्बाधम् । परम्परया निमित्तत्वस्य चैत्रादेः सम्बन्धिनो न कारकत्वम् ।

यद्वा भवतु वैयाकरण-नैयायिकयोरुभयैरेव उक्तेषु लक्षणेषु व्याख्याभिर्दोषापनयनसम्भवात् न त्यज्यानि । सामान्यतः क्रियानिर्वर्तकत्वं कारकत्वमिति वक्तुं शक्यते, अस्मिन्नेव लक्षणे व्याख्यानतो विशेषप्रतिपत्तिसम्भवात् ।

[३६] अष्टाध्यायी- १.४.५१

[३७] ल.श.शे, कारकप्रकरणे

[३८] ल.श.शे, कारकप्रकरणे

[३९] प.ल.म.,कारकार्थनिरूपणम्

[४०] प.ल.म.,कारकार्थनिरूपणम्

मन्ये कारकस्य लक्षणे कृते दोषा उद्भावयितुं शक्यते इत्यतो महामुनिना पाणिनिना कारके इति सूत्रं संज्ञाधिकारत्वेनैव पठित्वा तूष्णीमवतिष्ठत इति शिवम् ।

**स्वीकारोक्तिः**

पत्रमिदं समीक्षणात्मकं न कस्मादपि लेखात् संगृहीतम्, न वा कुत्रापि पूर्वं प्रकाशितम् । बहूनि ग्रन्थानि अधीत्य तत्रोस्था उक्तीः परिभाव्य स्वमतानि संयोज्यैव लिखितमिदं पत्रम् ।

**सांकेतिवर्णसूची**

वै.सि.कौ= वैयाकरणसिद्धान्तकौमुदी

म.भा= महाभाष्यम्

वा.प = वाक्यपदीयम्

का.वृ = काशिकावृत्तिः

ल.श.शे = लघुशब्देन्दुशेखरः

श.श.प्र = शब्दशक्तिप्रकाशिका

का.च = कारकचक्रम्

व्या.द.इ = व्याकरण् दर्शनेर् इतिहास्

भू.सा = भूषणसारः

ल.सि.कौ = लघुसिद्धान्तकौमुदी

प.ल.म. = परमलघुमञ्जुषा

**सहायकग्रन्थनिर्देशः**

1. खण्डुडी सत्यनारायणः, वाक्यपदीयम् (ब्रह्मकाण्डम्), चौखम्बा कृष्णदास अकादमी, वाराणसी, चतुर्थसंस्करणम्- २०११
2. गंगोपाध्यायः मृणालकान्तिः, वाक्यपदीयम् (साधनसमुद्देशः), संस्कृत बुक् डिपो, कलिकाता, प्रथमसंस्करणम्- २०१३
3. चतुर्वेदशर्मा गिरिधारी, वैयाकरणसिद्धान्तकौमुदी, मोतीलाल वनारसी दास, देहली, २०१०, (प्रथमसंस्करणम् -१९६१)
4. तिवारी परिनारायणः, व्युत्पत्तिवादः, चौखम्बा विद्याभवनम्, वाराणसी, प्रथमसंस्करणम्- २००५
5. त्रिपाठी जयशंकरलालः, परमलघुमञ्जुषा, चौखम्बा कृष्णदास अकादमी, वाराणसी, चतुर्थसंस्करणम्- २०११

6. त्रिपाठी जयशंकरलालः, मालवीयः सुधाकरश्च, काशिका, तारा बुक् एजेन्सी, वाराणसी, पुनर्मुद्रितसंस्करणम् -२००९
7. दाहालः लोकमणिः, परमलघुमञ्जुषा, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, पुनर्मुद्रितसंस्करणम् -२०११
8. दीक्षितः पुष्पा, अष्टाध्यायीसूत्रपाठः, ज्ञानभारती पाब्लिकेशन्, देहली, २००९
9. पेन्ना मधुसूदनः, वैयाकरणभूषणसारः, न्यू भारतीय बुक् कर्पोरेशन्, देहली, प्रथमसंस्करणम्- २००७
10. वराखण्डी श्रीनिवासः, कारकवादः, पूर्णप्रज्ञासंशोधनमन्दिरम्, वैङ्गालुरू, प्रथमसंस्करणम् -२००७
11. वन्द्योपाध्यायः अशोककुमारः, कारकचक्रम्, सदेशः, कलिकाता, प्रथमसंस्करणम् -२००८
12. भट्टाचार्यशास्त्री पञ्चाननः, भाषापरिच्छेदः, संस्कृत बुक् डिपो, कलिकाता,द्वितीयसंस्करणम्- १८८४
13. रायचौधुरी अनामिका, भाषापरिच्छेदः, संस्कृतपुस्तकभाण्डारः, कलिकाता, तृतीयप्रकाशनम्- २०११, (प्रथमप्रकाशः – २००४)
14. शास्त्री बालः, लघुशब्देन्दुशेखरः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रथमसंस्करणम् – २०१३
15. शास्त्री भीमसेनः, वैयाकरणभूषणसारः( तिङर्थनिर्णयः), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्- १९६९
16. शास्त्री रवीन्द्रनाथः, सारमञ्जरी, रामकृष्णमिशन् इन्स्टिट्युशन् अफ् कलचार्, कलिकाता, प्रथमप्रकाशः- १९९३
17. शास्त्री भार्गवः, महाभाष्यम्, चौखम्बा संस्कृतप्रतिष्ठानम्, देहली, पुनर्मुद्रितसंस्करणम् – २०११
18. शास्त्री ढुण्डिराजः, शब्दशक्तिप्रकाशिका, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, पञ्चमसंस्करणम् – २०१३, (प्रथमप्रकाशः- १९९१)
19. सान्याल् शास्त्री अयोध्यानाथः, वैयाकरणसिद्धान्तकौमुदी, संस्कृतपुस्तकभाण्डारः, कलिकाता, तृतीयसंस्करणम् -१४७८ (बङ्गाब्दः), प्रथमप्रकाशः- १३६०(बङ्गाब्दः)
20. हाल्दार् गुरुपदः, व्याकरण् दर्शनेर् इतिहास्, संस्कृत बुक् डिपो, कलिकाता, पुनर्मुद्रितसंस्करणम् – २००६, प्रथमप्रकाशः- १३६० (बङ्गाब्दः)